# ॐ श्री परमात्मने नमः। अथ पञ्चदशोऽध्यायः । पुरुषोत्तमयोगः ।

| | | | |
|---|---|---|---|
| श्रीभगवानुवाच । | | | |
| ऊर्ध्वमूलमधःशाखम् | अश्वत्थं प्राहुरव्ययम्। | यतन्तो योगिनश्चैनम् | पश्यन्त्यात्मन्यवस्थितम्। |
| छन्दांसि यस्य पर्णानि | यस्तं वेद स वेदवित्॥ १॥ | यतन्तोऽप्यकृतात्मानः | नैनं पश्यन्त्यचेतसः॥ ११॥ |
| अधश्चोर्ध्वं प्रसृतास्तस्य शाखाः | गुणप्रवृद्धा विषयप्रवालाः। | यदादित्यगतं तेजः | जगद्भासयतेऽखिलम्। |
| अधश्च मूलान्यनुसन्ततानि | कर्मानुबन्धीनि मनुष्यलोके॥ २॥ | यच्चन्द्रमसि यच्चाग्नौ | तत्तेजो विद्धि मामकम्॥ १२॥ |
| न रूपमस्येह तथोपलभ्यते | नान्तो न चादिर्न च सम्प्रतिष्ठा। | गामाविश्य च भूतानि | धारयाम्यहमोजसा। |
| अश्वत्थमेनं सुविरूढमूलम् | असङ्गशस्त्रेण दृढेन छित्त्वा॥ ३॥ | पुष्णामि चौषधीः सर्वाः | सोमो भूत्वा रसात्मकः॥ १३॥ |
| ततः पदं तत्परिमार्गितव्यम् | यस्मिन्गता न निवर्तन्ति भूयः। | अहं वैश्वानरो भूत्वा | प्राणिनां देहमाश्रितः। |
| तमेव चाद्यं पुरुषं प्रपद्ये | यतः प्रवृत्तिः प्रसृता पुराणी॥ ४॥ | प्राणापानसमायुक्तः | पचाम्यन्नं चतुर्विधम्॥ १४॥ |
| निर्मानमोहा जितसङ्गदोषाः | अध्यात्मनित्या विनिवृत्तकामाः। | सर्वस्य चाहं हृदि संनिविष्टः | मत्तः स्मृतिर्ज्ञानमपोहनं च। |
| द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैः | गच्छन्त्यमूढाः पदमव्ययं तत्॥ ५॥ | वेदैश्च सर्वैरहमेव वेद्यः | वेदान्तकृद्वेदविदेव चाहम्॥ १५॥ |
| न तद्भासयते सूर्यः | न शशाङ्को न पावकः। | द्वाविमौ पुरुषौ लोके | क्षरश्चाक्षर एव च। |
| यद्गत्वा न निवर्तन्ते | तद्धाम परमं मम॥ ६॥ | क्षरः सर्वाणि भूतानि | कूटस्थोऽक्षर उच्यते॥ १६॥ |
| ममैवांशो जीवलोके | जीवभूतः सनातनः। | उत्तमः पुरुषस्त्वन्यः | परमात्मेत्युदाहृतः। |
| मनःषष्ठानीन्द्रियाणि | प्रकृतिस्थानि कर्षति॥ ७॥ | यो लोकत्रयमाविश्य | बिभर्त्यव्यय ईश्वरः॥ १७॥ |
| शरीरं यदवाप्नोति | यच्चाप्युत्क्रामतीश्वरः। | यस्मात्क्षरमतीतोऽहम् | अक्षरादपि चोत्तमः। |
| गृहीत्वैतानि संयाति | वायुर्गन्धानिवाशयात्॥ ८॥ | अतोऽस्मि लोके वेदे च | प्रथितः पुरुषोत्तमः॥ १८॥ |
| श्रोत्रं चक्षुःस्पर्शनं च | रसनं घ्राणमेव च। | यो मामेवमसंमूढः | जानाति पुरुषोत्तमम्। |
| अधिष्ठाय मनश्चायम् | विषयानुपसेवते॥ ९॥ | स सर्वविद्भजति माम् | सर्वभावेन भारत॥ १९॥ |
| उत्क्रामन्तं स्थितं वापि | भुञ्जानं वा गुणान्वितम्। | इति गुह्यतमं शास्त्रम् | इदमुक्तं मयानघ। |
| विमूढा नानुपश्यन्ति | पश्यन्ति ज्ञानचक्षुषः॥ १०॥ | एतद्बुद्ध्वा बुद्धिमान्स्यात् | कृतकृत्यश्च भारत॥ २०॥ |

ॐ तत् सत्

इति श्रीमद् भगवद् गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः॥

om śrī paramātmane namaḥ. atha pañcadaśo'dhyāyaḥ. puruṣottamayogaḥ.

| | |
|---|---|
| śrībhagavānuvāca<br>ūrdhvamūlamadhaḥśākham<br>aśvatthaṁ prāhuravyayam<br>chandāṁsi yasya parṇāni<br>yastaṁ veda sa vedavit 1 | yatanto yoginaścainam<br>paśyantyātmanyavasthitam<br>yatanto'pyakṛtātmānaḥ<br>nainaṁ paśyantyacetasaḥ 11 |
| adhaścordhvaṁ prasṛtāstasya śākhāḥ<br>guṇapravṛddhā viṣayapravālāḥ<br>adhaśca mūlānyanusantatāni<br>karmānubandhīni manuṣyaloke 2 | yadādityagataṁ tejaḥ<br>jagadbhāsayate'khilam<br>yaccandramasi yaccāgnau<br>tattejo viddhi māmakam 12 |
| na rūpamasyeha tathopalabhyate<br>nānto na cādirna ca sampratiṣṭhā<br>aśvatthamenaṁ suvirūḍhamūlam<br>asaṅgaśastreṇa dṛḍhena chittvā 3 | gāmāviśya ca bhūtāni<br>dhārayāmyahamojasā<br>puṣṇāmi cauṣadhīḥ sarvāḥ<br>somo bhūtvā rasātmakaḥ 13 |
| tataḥ padaṁ tatparimārgitavyam<br>yasmingatā na nivartanti bhūyaḥ<br>tameva cādyaṁ puruṣaṁ prapadye<br>yataḥ pravṛttiḥ prasṛtā purāṇī 4 | ahaṁ vaiśvānaro bhūtvā<br>prāṇināṁ dehamāśritaḥ<br>prāṇāpānasamāyuktaḥ<br>pacāmyannaṁ caturvidham 14 |
| nirmānamohā jitasaṅgadoṣāḥ<br>adhyātmanityā vinivṛttakāmāḥ<br>dvandvairvimuktāḥ sukhaduḥkhasaṁjñaiḥ<br>gacchantyamūḍhāḥ padamavyayaṁ tat 5 | sarvasya cāhaṁ hṛdi saṁniviṣṭaḥ<br>mattaḥ smṛtirjñānamapohanaṁ ca<br>vedaiśca sarvairahameva vedyaḥ<br>vedāntakṛdvedavideva cāham 15 |
| na tadbhāsayate sūryaḥ<br>na śaśāṅko na pāvakaḥ<br>yadgatvā na nivartante<br>taddhāma paramaṁ mama 6 | dvāvimau puruṣau loke<br>kṣaraścākṣara eva ca<br>kṣaraḥ sarvāṇi bhūtāni<br>kūṭastho'kṣara ucyate 16 |
| mamaivāṁśo jīvaloke<br>jīvabhūtaḥ sanātanaḥ<br>manaḥṣaṣṭhānīndriyāṇi<br>prakṛtisthāni karṣati 7 | uttamaḥ puruṣastvanyaḥ<br>paramātmetyudāhṛtaḥ<br>yo lokatrayamāviśya<br>bibhartyavyaya īśvaraḥ 17 |
| śarīraṁ yadavāpnoti<br>yaccāpyutkrāmatīśvaraḥ<br>gṛhītvaitāni saṁyāti<br>vāyurgandhānivāśayāt 8 | yasmātkṣaramatīto'ham<br>akṣarādapi cottamaḥ<br>ato'smi loke vede ca<br>prathitaḥ puruṣottamaḥ 18 |
| śrotraṁ cakṣuḥsparśanaṁ ca<br>rasanaṁ ghrāṇameva ca<br>adhiṣṭhāya manaścāyam<br>viṣayānupasevate 9 | yo māmevamasaṁmūḍhaḥ<br>jānāti puruṣottamam<br>sa sarvavidbhajati mām<br>sarvabhāvena bhārata 19 |
| utkrāmantaṁ sthitaṁ vāpi<br>bhuñjānaṁ vā guṇānvitam<br>vimūḍhā nānupaśyanti<br>paśyanti jñānacakṣuṣaḥ 10 | iti guhyatamaṁ śāstram<br>idamuktaṁ mayānagha<br>etadbuddhvā buddhimānsyāt<br>kṛtakṛtyaśca bhārata 20 |

om tat sat

iti śrīmad bhagavad gītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde puruṣottamayogo nāma pañcadaśo'dhyāyaḥ.